अगस्त्याष्टकं

अगस्त्याष्टकं

अद्य मे सफलं जन्म चाद्य मे सफलं तपः |
अद्य मे सफलं ज्ञानं शंभो त्वत्पाददर्शनात् || 1 ||

कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं महेश्वर |
अद्य ते पादपद्मस्य दर्शनाद्भक्तवत्सल || 2 ||

शिवः शंभुः शिवः शंभुः शिवः शंभुः शिवः शिवः |
इति व्याहरतो नित्यं दिनान्यायांतु यांतु मे || 3 ||

शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे |
सदा भूयात्सदा भूयात्सदा भूयात्सुनिश्चला || 4 ||

अजन्ममरणं यस्य महादेवान्यदैवतं |
मा जनिष्यत मद्वंशे जातो वा द्राग्विपद्यतां || 5 ||

जातस्य जायमानस्य गर्भस्थस्यापि देहिनः |
मा भून्मम कुले जन्म यस्य शंभुर्न दैवतं || 6 ||

वयं धन्या वयं धन्या वयं धन्या जगत्त्रये |
आदिदेवो महादेवो यदस्मत्कुलदैवतं || 7 ||

हर शंभो महादेव विश्वेशामरवल्लभ |
शिवशंकर सर्वात्मन्नीलकंठ नमोऽस्तु ते || 8 ||

अगस्त्याष्टकमेतत्तु यः पठेच्छिवसन्निधौ |
शिवलोकमवाप्नोति शिवेन सह मोदते || 9 ||

इत्यगस्त्याष्टकं |